# શ્રીબાલામન્ત્રસિદ્ધિસ્તવઃ

ShriBala Mantra Siddhi StavaH

sanskritdocuments.org

April 8, 2018

# ShriBala Mantra Siddhi StavaH

# શ્રીબાલામન્ત્રસિદ્ધિસ્તવઃ

## Sanskrit Document Information

Text title : bAlAmantrasiddhistavaH

File name : bAlAmantrasiddhistavaH.itx

Category : devii, dashamahAvidyA

Location : doc_devii

Proofread by : NA

Description/comments : bAlA saparyA

Latest update : April 8, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

April 8, 2018

*sanskritdocuments.org*

# શ્રીબાલામન્ત્રસિદ્ધિસ્તવઃ

બ્રાહ્મીરૂપધરે દેવિ બ્રહ્માત્મા બ્રહ્મપાલિકા ।
વિદ્યામન્ત્રાદિકં સર્વં સિદ્ધિં દેહિ પરેશ્વરિ ॥ ૧॥

મહેશ્વરી મહામાયા માનન્દા મોહહારિણી ।
મન્ત્રસિદ્ધિફલં દેહિ મહામન્ત્રાર્ણવેશ્વરિ ॥ ૨॥

ગુહ્યેશ્વરી ગુણાતીતા ગુહ્યતત્ત્વાર્થદાયિની ।
ગુણત્રયાત્મિકા દેવી મન્ત્રસિદ્ધિં દદસ્વ મામ્ ॥ ૩॥

નારાયણી ચ નાકેશી નૃમુણ્ડમાલિની પરા ।
નાનાનના નાકુલેશી મન્ત્રસિદ્ધિં પ્રદેહિ મે ॥ ૪॥

ધૃષ્ટિચક્રા મહારૌદ્રી ઘનોપમવિવર્ણકા ।
ઘોરઘોરતરા ઘોરા મન્ત્રસિદ્ધિપ્રદા ભવ ॥ ૫॥

શક્રાણી સર્વદૈત્યઘ્ની સહસ્રલોચની શુભા ।
સર્વારિષ્ટવિનિર્મુક્તા સા દેવી મન્ત્રસિદ્ધિદા ॥ ૬॥

ચામુણ્ડારૂપદેવેશી ચલજ્જિહ્વા ભયાનકા ।
ચતુષ્પીઠેશ્વરી દેહિ મન્ત્રસિદ્ધિં સદા મમ ॥ ૭॥

લક્ષ્મીલાવણ્યવર્ણા ચ રક્તા રક્તમહાપ્રિયા ।
લમ્બકેશા રત્નભૂષા મન્ત્રસિદ્ધિં સદા દદ ॥ ૮॥

બાલા વીરાર્ચિતા વિદ્યા વિશાલનયનાનના ।
વિભૂતિદા વિષ્ણુમાતા મન્ત્રસિદ્ધિં પ્રયચ્છ મે ॥ ૯॥

ફલશ્રુતિઃ ।
મન્ત્રસિદ્ધિસ્તવં પુણ્યં મહામોક્ષફલપ્રદમ્ ।
મહામોહહરં સાક્ષાત્ સત્યં મન્ત્રસ્ય સિદ્ધિદમ્ ॥ ૧૦॥

ઇતિ મહાકાલસંહિતાયાં શ્રીબાલામન્ત્રસિદ્ધિસ્તવઃ સમ્પૂર્ણઃ ।

*ShriBala Mantra Siddhi StavaH*

pdf was typeset on April 8, 2018

Please send corrections to *sanskrit@cheerful.com*